# Shri Vighneshvara Ashtottarashatanama Stotram

# શ્રીવિઘ્નેશ્વરાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : vighneshvarAShTottara shatanAmastotram

File name : vighneshvar108Str.itx

Category : aShTottarashatanAma, ganesha, stotra

Location : doc_ganesha

Author : Traditional

Proofread by : Sunder Hattangadi.com. NA

Description-comments : See corresponding nAmAvalI

Latest update : March 30, 2002, November 27, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

# શ્રીવિઘ્નેશ્વરાષ્ટોત્તરશતનામસ્તોત્રમ્

ૐ વિનાયકો વિઘ્નરાજો ગૌરીપુત્રો ગણેશ્વરઃ ।
સ્કન્દાગ્રજોઽવ્યયો પૂતો દક્ષોઽધ્યક્ષો દ્વિજપ્રિયઃ ॥ ૧॥

અગ્નિગર્ભચ્છિદિન્દ્રશ્રીપ્રદો વાણીબલપ્રદઃ ।
સર્વસિદ્ધિપ્રદશ્શર્વતનયઃ શર્વરીપ્રિયઃ ॥ ૨॥

સર્વાત્મકઃ સૃષ્ટિકર્તા દેવોઽનેકાર્ચિતશ્શિવઃ ।
શુદ્ધો બુદ્ધિપ્રિયશ્શાન્તો બ્રહ્મચારી ગજાનનઃ ॥ ૩॥

દ્વૈમાત્રેયો મુનિસ્તુત્યો ભક્તવિઘ્નવિનાશનઃ ।
એકદન્તશ્ચતુર્બાહુશ્ચતુરશ્શક્તિસંયુતઃ ॥ ૪॥

લમ્બોદરશ્શૂર્પકર્ણો હરિર્બ્રહ્મ વિદુત્તમઃ ।
કાલો ગ્રહપતિઃ કામી સોમસૂર્યાગ્નિલોચનઃ ॥ ૫॥

પાશાઙ્કુશધરશ્ચણ્ડો ગુણાતીતો નિરઞ્જનઃ ।
અકલ્મષસ્સ્વયંસિદ્ધસ્સિદ્ધાર્ચિતપદામ્બુજઃ ॥ ૬॥

બીજપૂરફલાસક્તો વરદશ્શાશ્વતઃ કૃતિઃ ।
દ્વિજપ્રિયો વીતભયો ગદી ચક્રીક્ષુચાપધૃત્ ॥ ૭॥ વિદ્વત્પ્રિયો

શ્રીદોઽજોત્પલકરઃ શ્રીપતિઃ સ્તુતિહર્ષિતઃ ।
કુલાદ્રિભેત્તા જટિલઃ કલિકલ્મષનાશનઃ ॥ ૮॥

ચન્દ્રચૂડામણિઃ કાન્તઃ પાપહારી સમાહિતઃ ।
આશ્રિતશ્શ્રીકરસ્સૌમ્યો ભક્તવાઞ્છિતદાયકઃ ॥ ૯॥

શાન્તઃ કૈવલ્યસુખદસ્સચ્ચિદાનન્દવિગ્રહઃ ।
જ્ઞાની દયાયુતો દાન્તો બ્રહ્મ દ્વેષવિવર્જિતઃ ॥૧૦॥

પ્રમત્તદૈત્યભયદઃ શ્રીકણ્ટ્ઃઓ વિબુધેશ્વરઃ ।
રમાર્ચિતોવિધિર્નાગરાજયજ્ઞોપવીતકઃ ॥૧૧॥

સ્થૂલકણ્ઠઃ સ્વયઙ્કુર્તા સામઘોષપ્રિયઃ પરઃ ।
સ્થૂલતુણ્ડોઽગ્રણીર્ધીરો વાગીશસ્સિદ્ધિદાયકઃ ॥ ૧૨॥

દૂર્વાબિલ્વપ્રિયોઽવ્યક્તમૂર્તિરદ્ભુતમૂર્તિમાન્ ।
શૈલેન્દ્રતનુજોત્સઙ્ગખેલનોત્સુકમાનસઃ ॥ ૧૩॥

સ્વલાવણ્યસુધાસારો જિતમન્મથવિગ્રહઃ ।
સમસ્તજગદાધારો માયી મૂષકવાહનઃ ॥૧૪॥

હૃષ્ટસ્તુષ્ટઃ પ્રસન્નાત્મા સર્વસિદ્ધિપ્રદાયકઃ ।
અષ્ટોત્તરશતેનૈવં નામ્નાં વિઘ્નેશ્વરં વિભું ॥ ૧૫॥

તુષ્ટાવ શઙ્કરઃ પુત્રં ત્રિપુરં હન્તુમુત્યતઃ ।
યઃ પૂજયેદનેનૈવ ભક્ત્યા સિદ્ધિવિનાયકમ્ ॥૧૬॥

દૂર્વાદલૈર્બિલ્વપત્રૈઃ પુષ્પૈર્વા ચન્દનાક્ષતૈઃ ।
સર્વાન્કામાનવાપ્નોતિ સર્વવિઘ્નૈઃ પ્રમુચ્યતે ॥

ઇતિ શ્રીવિઘ્નેશ્વરાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

વિનાયકાષ્ટોત્તરશતનામસ્તોત્રમ્

*Shri Vighneshvara Ashtottarashatanama Stotram*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*